No. ११८४ घ

Title चरण समूहः

Author

Extent ४ पत्राणि Age

Subject वेदभागः

चरणव्यूहः

११८५

ॐ श्रीगणेशायनमः ॥ ॐ अथातश्चरणव्यूहंव्याख्यास्यामस्तत्रयदुक्तंचातुर्वैद्यं ॥ च
त्वारोवेदाविज्ञाताभवंति ऋग्वेदोयजुर्वेदः सामवेदोथर्ववेदश्चेति त
त्रऋग्वेदस्याष्टौभेदाभवंति चर्चाश्रवकश्चर्चकः श्रवणीयपारः क्रमपा पा
ठः क्रमरथः क्रमजटः क्रमदंडश्चेति चतुःपारायणमेतेषांशाखाःपं
चभवंति आश्वलायनीसांख्यायनीशाकलबाष्कलामांडूकेयाश्चेति ते
षामध्ययनमध्यायाश्चतुःषष्टिर्मंडलानिदशैवतु वर्गाणांपरिसंख्यातंद्वे
सहस्रेषडुत्तरे सहस्रमेकंसूक्तानांनिर्विशंकंविकल्पितं दशसह
स्रतुपठ्यंते संख्यातंवैपदक्रमं एकंशतंसहस्रंवाद्विपंचाशत्सह
स्रार्धमेतानि चतुर्दशवासिष्ठानांमितरेषांपंचाशीतिक्रमकालेतुवेद
वे चतुस्त्रिंशतिसहस्राणिद्विषष्ठानांसहस्राणांद्वात्रिंशतिषोडशोत्त
राः चत्वारिंशत्सहस्राणिद्वात्रिंशतेचाक्षरसहस्राणि ऋचांदशस
हस्राणिऋचांपंचशतानिच ऋचामशीतिपादश्चेतत्पारायणमुच्यते

एकर्चैकवर्गश्चैकस्तु नैकस्तथा द्वौ वर्गौ द्विकद्वौ त्रैयौ त्रीणि च शतानि तथा
सहस्रमेकं पंचकानांशानन्स्रनविंशमहाकानां द्वे च सत्योनरेषाने च तत्रं
चैगौणिणानानिबद्धानांगीणाह्रिरष्टकानां यजुर्वेदस्य षडशीतिर्भेदा भ
वंति तत्र चरकानां द्वादश भेदा भवंति चरका आह्वरकाः कठाः प्राच्यकठाः
कपिष्ठलकठाः चारायणीया वार्तांतवेयाः श्वेताः श्वेततराः मैत्राय
णीयाश्चेति तत्र मैत्रायणीया नाम सप्त भेदा भवंति मानवा दुंदुभाश्चैकेया वा
हा हारिद्रवेयाः श्यामाः श्यामायनीयाश्चेति तेषामध्ययनमष्टाशातेयुः
ग्रः सहस्राण्यधीत्य शाखापारो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति
तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति शिक्षा कल्पो व्याकरणं निरुक्तं
छंदो ज्योतिषमित्यंगानि तत्र प्राच्योदीच्या नैर्ऋत्या नैरंतर्या तत्र वाजसने
यानां पंचदश भेदा भवंति जाबाला बौधेयाः काण्वाः माध्यंदिनाः शापे

घास्लायायनीयाः कापालपौंडुवत्साः आवटिकपाराशर्यावैनेयावैनेजाग्नौ
२ धेयागालवज्ञयाः कात्यायनीयाश्चेति प्रतिपदमनुपदं छंदोभाषाधर्मो मीमां
सान्यायस्तर्कश्चेत्युपांगानि उपज्योतिषांसो गलन्तणिनुमेलत्तणिक्षागलद
प्रतिज्ञानुवाक्यः परिसंख्याचरणव्यूहः श्राद्धकल्पः प्रवराध्यायश्चेत्यास्य
कृतसंख्यानुगमयते पार्श्वेनहोकेपशाडोकयानिर्मूलदणिमित्यष्टदश
परिशिष्टानिभवंति हैसहस्रेशतेन्यूनेमंत्रेवाजसनेयके इत्युक्तंपरिसंख्या
कमेतत्सकलंशुक्रियं ग्रंथाश्चपरिसंख्यातानातत्प्रमाणंचचनत्रेरडण तत्र
तैत्तिरीयकानामद्विभेदाभवंति औख्याः खांडिकेयाश्चेति खांडिकेयानामपंचभेदा
भवंति आपस्तंबी बौधायनी सत्याषाढी हिरण्यकेशी औधेयीश्चेति त
त्रकठानामुपगाममिति विशेषश्चतेश्चत्वारिंशात्पुपगंयामेत्राब्राह्मणयोर्वे
दः त्रिगुणंयत्रपठ्यते यजुर्वेदः सविज्ञेयोशेषाः शाखांतराःस्मृताः तेषामध्या २

यनेमध्वनीयाश्चेति २ सामवेदस्य किलसहस्रभेदाआसीत् ध्यायेष्व
धीयानास्तेशक्रेणाभिहताः प्रनष्टाः शेषान्नवदृयाम्यास्तुरायणीयवा
तांतृथेयाः शालिकञ्जैवेनाभिदाः प्राचिनयोग्यानन्योग्याश्चेति नवराणा
यनीयानांनवभेदाभवंति राणायणीयशाट्यायनीयाशाखामुद्गलाखल
लालांगलावैलवागौतमाजैमिनीयाश्चेति तेषामध्ययनमष्टौसामसः
हस्राणिसामानिचतुर्दश श्रेष्ठोपुनानिभवंति दषाघनःसवालिखिल्यः
ससुवर्णश्रेष्ठापनन्सामगणानेस्टते ३ अथर्वणवेदस्यानवभेदाभवंति
पैप्पलादातौः मदातांश्रौतांभौतांब्रह्मशाकलाशौनकेदेविदर्शीचरम
विद्याश्चेति तेषामध्ययनेपंचकल्पोनिभवंति नक्षत्रकल्पोविधान
कल्पोविधिविधानकल्पः शांतिकल्पश्चेति सर्वेषांवेदानामुपवे
दाभवंति ऋग्वेदस्यागिरसोपवेदोयजुर्वेदस्यधनुर्वेदोपवेदः सामवे

स्यगंधर्ववेदोऽर्थवेदः अथर्ववेदस्य सर्वशास्त्राणामाद्याभवति ऋग्वेदस्यात्रि
गोत्रं ब्रह्मदैवत्यं गायत्रीछंदो यजुर्वेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं त्रैष्टुभंछं
दः सामवेदस्य काश्यपगोत्रं विष्णुदैवत्यं जागतंछंदोऽथर्ववेदस्य वैजानगो
मैंद्रदैवत्यमानुष्टुभंछंदः ऋग्वेदो रक्तवर्णः पद्मपत्रायताक्षः सुविभ
क्तग्रीवः कुंचितकेशश्मश्रुः प्रमाणेन द्विरत्निसंयतः यजुर्वेदः कृशोदीर्घः क
पालीताम्रवर्णः कांचननयनस्तेनोवर्णो वर्णेन पंचारत्निमात्रः साम
वेदो नित्यसुरविशुचिः शुचौ वाशी सोमी दांतिधर्मिदंडी कांचननयन
आदित्यवर्णो निषडरत्निमात्रः ॐ अथर्ववेदः स्त्रीस्वाध्यदंडः कृष्णः कामः
कामरूपी क्षुद्रकर्मी सपत्नसाध्यसविष्टुः सजगलमूर्त्तिगालवः सदार
तश्चापरस्यां प्राणाश्चेति यद्यमंदैवतंद्रूपगोत्रं प्रमाणंछंदो वर्णो वर्णाः इति
ते विद्यालभंते जन्मनिवेदयारोभवति जन्मजन्मनिवेदयारोभवति ॥ २

पूतोभवतिभवत्यग्निहोत्रेणाग्निहोत्रीभवत्यब्रह्मचारीभवति जातिस्मरोजा-
यते नमः शौनकायनमः शौनकाय यइदंचरणव्यूहंपर्वसुश्रावये-
४ द्विजः श्रोतव्यमाम्नायविधिर्विप्रोब्रह्मभूयायकल्पते यइदंचरणव्यूहंश्रा-
द्धकालेतुयःपठेत् अक्षय्यंतद्भवेच्छ्राद्धंपितरस्तेवोपतिष्ठन्ति योऽधीते
चरणव्यूहंसविप्रःपङ्क्तिपावनः तारयत्यखिलान्सर्वान्पुरुषान्सप्त
सप्तच योनामनिपुणोदेवाश्रमनत्वंचगच्छति लोकातीतेनमहात्मना
तेनमन्त्रंचराकसौनमहत्याहभगवान्व्यासः पाराशर्यः परमऋषि-
भ्योनमः परमऋषिभ्योनमः इति इतिचरणव्यूहंसमाप्तम् ।।

4